हनुमन्नमस्कारः

हनुमन्नमस्कारः

अतुलितबलधामं हेमशैलाभदेहं
दनुजवनकृशानुं ज्ञानिनामग्रगण्यं |
सकलगुणनिधानं वानराणामधीशं
रघुपतिप्रियभक्तं वातजातं नमामि || 1 ||

गोष्पदीकृतवारीशं मशकीकृतराक्षसं |
रामायणमहामालारत्नं वंदेऽनिलात्मजं || 2 ||

अंजनानंदनं वीरं जानकीशोकनाशनं |
कपीशमक्षहंतारं वंदे लंकाभयंकरं || 3 ||

महाव्याकरणांभोधि-मंथमानसमंदरं |
कवयंतं रामकीर्त्या हनुमंतमुपास्महे || 4 ||

उल्लंघ्य सिंधोः सलिलं सलीलं
यः शोकवह्निं जनकात्मजायाः |
आदाय तेनैव ददाह लंकां
नमामि तं प्रांजलिरांजनेयं || 5 ||

मनोजवं मारुततुल्यवेगं
जितेंद्रियं बुद्धिमतां वरिष्ठं |
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शिरसा नमामि || 6 ||

आंजनेयमतिपाटलाननं
कांचनाद्रिकमनीयविग्रहं |
पारिजाततरुमूलवासिनं
भावयामि पवमाननंदनं || 7 ||

यत्र यत्र रघुनाथकीर्तनं
तत्र तत्र कृतमस्तकांजलिं |
बाष्पवारिपरिपूर्णलोचनं
मारुतिं नमत राक्षसांतकं || 8 ||